## .. रामरक्षा स्तोत्र ..

श्रीगणेशाय नमा । अस्य श्रीरामरक्षास्तोत्र मंत्रस्य । बुधकौशिक ऋषि।
श्रीसीतारामचंद्रो देवता। अनुष्टुप् छंद। सीता शक्ति। श्रीमत् हनुमान् कीलकम्
श्रीरामचंद्रप्रीत्यर्थे रामरक्षा स्तोत्रजपे विनियोग ।

.. अथ ध्यानम् ..

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं
पीतं वासो वसानं नवकमलदल स्पर्धिनेत्रं प्रसन्नम्
वामाङ्कारूढ सीता मुखकमलमिलल्लोचनं नीरदाभं
नानालङ्कारदीप्तं दधतमुरुजटामण्डनं रामचन्द्रम् ..

.. इति ध्यानम् ..

चरितं रघुनाथस्य शतकोटि प्रविस्तरम्
एकैकम् अक्षरं पुंसां महापातक नाशनम् ...1

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम्
जानकी लक्ष्मणोपेतं जटामुकुट मण्डितम् ...2

सासितूण धनुर्बाण पाणिं नक्तं चरान्तकम्
स्वलीलया जगत्रातुम् आविर्भूतमजं विभुम् ...3

रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्वकामदाम्
शिरोमे राघवः पातु भालं दशरथात्मजः ...4

कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ...5

जिव्हा विद्यानिधिः पातु कण्ठं भरतवन्दितः
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ...6

करौ सीतापतिः पातु हृदयं जामदग्न्यजित्
मध्यं पातुखरध्वंसि नाभिं जाम्बवदाश्रयः ...7

सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः
ऊरू रघुत्तमः पातु रक्ष कुलविनाशकृत् ...8

जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः
पादौ बिभीषणश्रीदः पातु रामोःखिलं वपुः ...9

एतां रामबलोपेतां रक्षां यः सुकृती पठेत्
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ...10

पाताल भूतल व्योम चारिणश्छद्मचारिण
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामपिः ...11

रामेति रामभद्रेति रामचन्द्रेति वा स्मरेन्
नरोन लिप्यते पापैर्भुक्तिं च विन्दति ...12

जगज्जैत्रेक मन्त्रेण रामनाम्नाऽभिरक्षितम्
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ...13

वज्रपञ्जरनामेदं यो रामकवचं स्मरेत
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ...14

आदिष्टवान्यथा स्वप्ने रामरक्षाभिमां हरः
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ...15

आरामः कल्पवृक्षाणां विरामः सकालापदाम्
अभिरामस्त्रिलोकानां रामः श्रीमन् सनः प्रभुः ...16

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ
पुण्डरिकविशालाक्षौ चीरकृष्णाजिनाम्बरो ...17

फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ...18

शरण्यौ सर्वसत्वानां श्रेष्ठौ सर्वधनुष्मताम्
रक्षःकुलनिहन्तारौ त्रायेतां नो रघुत्तमौ ...19

आत्त सज्ज धनुषाविषु स्पृशा वक्षयाशुगनिषङ्ग संगिनौ
रक्षणाय मम रामलक्ष्मणावग्रताः पथि सदैव गच्छताम् ...20

सन्नद्धः कवची खड्गी चापबाणधरो युवा
गच्छमनोरथोऽस्माकं रामः पातु सलक्ष्मणः ...21

रामो दशरथिः शूरो लक्ष्मणानुचरो बली
काकुत्स्थः पुरुषः पूर्णः कौसल्येयो रघूत्तमः ...22

वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः
जानकीवल्लभः श्रीमानप्रमेय पराक्रमः ...23

इत्येतानि जपन्नित्यं मद्भक्तः श्रद्धयाऽन्वितः
अश्वमेधाधिकं पुण्यं संप्राप्नोति न संशयः ...24

रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम्
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नरः ...25

रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरम
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम्
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शान्तमूर्ति
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ...26

रामाय रामभद्राय रामचंद्राय वेधसे
रघुनाथाय नाथाय सीतायाः पतये नमः ...27

श्रीराम राम रघुनंदन राम राम
श्रीराम राम भरताग्रज राम राम
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणंभव राम राम ...28

श्रीरामचंद्रचरणौ मनसा स्मरामि
श्रीरामचंद्रचरणौ वचसा गृणामि
श्रीरामचंद्रचरणौ शिरसा नमामि
श्रीरामचंद्रचरणौ शरणं प्रपद्ये ...29

माता रामो मत्पिता रामचंद्रः स्वामी रामो मत्सखा रामचंद्रः
सर्वस्वं मे रामचंद्रो दयालूर्नान्यं जाने नैव जाने न जाने ...30

दक्षिणे लक्ष्मणो यस्य वामे तु जनकात्मजा
पूरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ...31

लोकाभिरामं रणरङ्गधीरं राजीव नेत्रं रघुवंशनाथम्
कारुण्यरूपम् करुणाकरं तं श्रीरामचंद्रं शरणं प्रपद्ये ...32

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम्
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शरणं प्रपद्ये ...33

कूजन्तं रामरामेति मधुरं मधुराक्षरम्
आरुह्य कविताशाखां वन्दे वाल्मिकिकोकिलम् ...34

आपादम् अपहर्तारं दातारं सर्वसंपदाम्
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ...35

भर्जनं भवबीजानाम् अर्जनं सुखसंपदाम्
तर्जनं यमदूतानां रामरामेति गर्जनम् ...36

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो मामुद्धर ...37

राम रामेति रामेति रमे रामे मनोरमे
सहस्त्रानाम तत्तुल्यं रामनाम वरानने ...38

इति श्रीबुधकौशिकविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम्